सभरसो मरुत्तो यज्ञेऽस्मिन्। ८४। स्वतवांश्च प्रघासी च सांतपनश्च गृह
मेधी च। क्रीडी च शाकी चोज्जेषी। ८५। इंद्रं दैवीर्विशो मरुतोनुवर्त्मानो
भवन्यथेंद्रं दैवीर्विशो मरुतोनुवर्त्मानो भवन्। एवमिमं यजमानन्दैवी
श्चविशो मानुषीश्चानुवर्त्मानो भवंतु। ८६। इमं स्तनमूर्जस्वंतं धयापां
प्रपीनमग्ने सरिरस्य मध्ये। उत्सं जुषस्व मधुमंतमर्वन्त्समुद्रियं स
दनमाविशस्व। ८७। घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्व
स्य धाम। अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्। ८८।

80

समुद्रादूर्मिर्मधुमाँ२॥ऽउदारदुपांशुनासममृतत्वमानट्। घृतस्य
नामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः।८९।वयंनाम।वयन्ना
मप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः।उपब्रह्माशृणवच्छस्य
मानंचतुःशृंगोऽवमीद्गौरऽएतत्।९०।चत्वारिशृंगात्रयोऽअस्यपादाद्वे
शीर्षेसप्तहस्तासोऽअस्यत्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२॥ऽ
आविवेश।९१।त्रिधाहितम्।त्रिधाहितंपणिभिर्गुह्यमानंगविदेवासो।
घृतमन्वविन्दन्।इन्द्रऽएकंसूर्यऽएकंजजानवेनादेकंस्वधया

निषत्तस्रुः ९२ एताऽअर्षंति हृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे घृतस्य
धाराऽअभिचाकशीमिहिरण्ययोवेतसोमध्यऽआसाम् ९३ सम्यक्स्रवंति
सरितोनधेनाऽअंतर्हृदामनसापूयमानाः एतेऽअर्षंत्यूर्मयोघृतस्यमृगाऽइ
वक्षिपणोरीषमाणाः ९४ सिंधोरिवप्राध्वनेशूघनासोवातप्रमियः पतयंति
यह्वाः घृतस्यधाराऽअरुषोन वाजीकाष्ठाभिंदन्नूर्मिभिःपिन्वमानः
९५ अभिप्रवंत समनेवयोषाःकल्याण्यःस्मयमानासोऽअग्निम् घृतस्यधा
राःसमिधोनसंतताजुषाणोहर्यतिजातवेदाः ९६ कन्याऽइववहतुमे तवा

ऽउऽ अंज्यंजानाऽ अभिचाकशीमि यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽ
अभितत्पवन्ते ९७ अभ्यर्षत सुष्टुतिं गव्यमाजिमास्मासु भद्रा द्रविणानि ध
त्त इमंयज्ञन्नयत देवतानो घृतस्य धारा मधुमत्पवन्ते ९८ धामन्ते विश्वंभु
वनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि अपामनीके समिथे यऽआभृत
स्तमश्याम मधुमन्तन्तऽऊर्म्मिम ९९ वाजश्च इतिसंहितायां सप्तदशो
ध्यायः १७ वाजश्चमे प्रसवश्चमे प्रयतिश्चमे प्रसितिश्चमे धीतिश्चमे क्र
तुश्चमे स्वरश्चमे श्लोकश्चमे श्रवश्चमे श्रुतिश्चमे ज्योतिश्चमे स्वश्चमे यज्ञेन

कल्पन्ताम्१ प्राणश्च मेपानश्चमे व्यानश्चमेसुश्चमे चित्तंचमऽ आधीतंचमे
वाक्चमे मनश्चमे चक्षुश्चमे श्रोत्रंचमे दक्षश्चमे बलंचमे यज्ञेन कल्पन्ताम्२
ओजश्च मे सहश्चमऽ आत्माचमेतनूश्चमे शर्म्मचमे वर्म्मचमेङ्गानि चमेस्थी
निचमेपरूꣳषि चमे शरीराणि चमऽ आयुश्चमेजराचमेयज्ञेन कल्पन्ताम्
३ ज्यैष्ठ्यंचमऽ आधिपत्यंचमेमन्युश्चमे भामश्चमेमश्चमेम्भश्चमे जेमाच
मेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्षिमाचमेद्राघिमाचमे वृद्धंचमेवृ
द्धिश्चमेयज्ञेनकल्पन्ताम् ४ सत्यंच मेश्रद्धाचमेजगच्चमेधनंचमेविश्वं

चमेमहश्चमेक्रीडाचमेमोदश्चमेजातंचमेजनिष्यमाणंचमेसूक्तंचमे
शुकृतंचमेयज्ञेनकल्पंताम् ५ ऋतंच ऋतंचमेमृतंचमेयक्ष्मंचमेना
मयच्चमेजीवातुश्चमेदीर्घायुत्वंचमेनमित्रंचमेभयंचमेसुखंचमेशयनंच
मेसूषाश्चमेसुदिनंचमेयज्ञेनकल्पंताम् ६ यंताच मेधर्त्ताचमेक्षेमश्च
मेधृतिश्चमेविश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमेसूश्चमेप्रसूश्चमे
सीरंचमेलयश्चमेयज्ञेनकल्पंताम् ७ शंच मेमयश्चमेप्रियंचमेनुका
मश्चमेकामश्चमे॰सौमनसश्चमेभगश्चमेद्रविणंचमेभद्रंचमेश्रेयश्च

मे वशीयश्च मे यशश्च मे यज्ञेन कल्पंताम् ८ ऊर्क्च मे सूनृता च मे पयश्च मे र
सश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च
म ऽ औद्भिद्यं च मे यज्ञेन कल्पंताम् ९ रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे वि
भु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मे क्षितं च मे न्नं च मे क्षुच्च मे यज्ञे
न कल्पंताम् १० वित्तं च वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे
सुपथ्यं च मऽ ऋद्धं च मऽ ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमति
श्च मे यज्ञेन कल्पंताम् ११ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गा

श्चखल्वाश्चमे प्रियंगवश्चमेणवश्चमे श्यामाकाश्चमे नीवाराश्चमे गोधूमा
श्चमे मसूराश्चमे यज्ञेनकल्पंताम् १२ अश्माच मेमृत्तिकाचमे गिरयश्च
मेपर्वताश्चमे सिकताश्चमे वनस्पतयश्चमे हिरण्यंचमेयश्चमे स्यामंचमे लो
हंचमे सीसंचमे त्रपुचमे यज्ञेनकल्पंताम् १३ अग्निश्चमऽआपश्चमे वीरु
धश्चमऽओषधयश्चमे कृष्टपच्याश्चमे कृष्टपच्याश्चमे ग्राम्याश्चमे पशव
ऽआरण्याश्चमे वित्तंचमे वित्तिश्चमे भूतंचमे भूतिश्चमेयज्ञेनकल्पंताम्
१४ वसुच मेवसतिश्चमेकर्म्मचमेशक्तिश्चमे र्थश्चमऽएमश्चमऽइत्याच

गतिश्चमेयज्ञेनकल्पंताम् १५ अग्निश्चमऽइंद्रश्चमेसोमश्चमऽइंद्रश्चमेस
विताचमऽइंद्रश्चमेसरस्वतीचमऽइंद्रश्चमेपूषाचमऽइंद्रश्चमेवृहस्पतिश्चम
ऽइंद्रश्चमेयज्ञेनकल्पंताम् १६ मित्रश्चमऽइंद्रश्चमेवरुणश्चमऽइंद्रश्चमे
धाताचमऽइंद्रश्चमेत्वष्टाचमऽइंद्रश्चमेमरुतश्चमइंद्रश्चमेविश्वेचमेदे
वाऽइंद्रश्चमेयज्ञेनकल्पंताम् १७ पृथिवीचमऽइंद्रश्चमेंतरिक्षंचम
इंद्रश्चमेद्यौश्चमऽइंद्रश्चमेसमाश्चमऽइंद्रश्चमेनक्षत्राणिचमऽइंद्रश्च
मेदिशश्चमऽइंद्रश्चमेयज्ञेनकल्पंताम् १८ अंशुश्चमेरश्मिश्चमे

दाभ्यश्चमेधिपतिश्चमऽउपांशुश्चमेन्तु" क्रश्चमेमंथीचमेयज्ञेनकल्पंता
म् १९ आग्रयणश्चमेवैश्वदेवश्चमेध्रुवश्चमेवैश्वानरश्चमऽऐंद्राग्न
श्चमेमहावैश्वदेवश्चमेमरुत्वतीयाश्चमेनिष्केवल्यश्चमेसावित्रश्चमेसा
रस्वतश्चमेपात्नीवतश्चमेहारियोजनश्चमेयज्ञेनकल्पंताम् २० स्रुचश्च
मेचमसाश्चमेवायव्यानिचमेद्रोणकलशश्चमेग्रावाणश्चमेधिषव
णेचमेपूतभृच्चमऽआधवनीयश्चमेवेदिश्चमेबर्हश्चमेस्वगाका
रश्चमेयज्ञेनकल्पंताम् २१ अग्निश्चमेघर्मश्चमेर्कश्चमेसूर्यश्च

मे प्राणश्च मेश्वमेधश्च मे पृथिवी च मे दितिश्च मे दितिश्च मे द्यौ
श्च मेंगुलयः शक्करयो दिशश्च मे यज्ञेन कल्पंताम् २२ व्रतं च मऽ ऋतवश्च
मे तपश्च मे संवत्सरश्च मेहोरात्रेऊर्वष्ठीवे बृहद्रथंतरे च मे यज्ञेन कल्पं
ताम् २३ एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे
नव च मे नव च मऽएकादश च मऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पंच
दश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म
एकविंशतिश्च मऽएकविंशतिश्च मे त्रयोविंशतिश्च मे त्रयोवि

ॐ शातिश्च मे पंच वि ॐ शातिश्च मे पंचा वि ॐ शातिश्च मे सप्त वि ॐ शातिश्च
मे सप्त वि ॐ शातिश्च मे नव वि ॐ शातिश्च मे नव वि ॐ शातिश्च मऽ एकात्रि
ॐ शाश्च मऽ एक त्रि ॐ शाश्च मे त्रयस्त्रि ॐ शाश्च मे यज्ञेन कल्पताम् २५ च
तस्रश्च मे ष्टौ च मे ष्टौ च मे द्वादश च मे द्वादशं च मे षोडश च मे षोडश च मे
वि ॐ शातिश्च मे र्वि ॐ शातिश्च मे श्चतु र्वि ॐ शातिश्च मे चतुर्वि ॐ शाति
श्च मे ष्टा वि ॐ शातिश्च मे द्वात्रिं ॐ शाश्च मे द्वात्रि ॐ शाश्च मे षट्त्रि ॐ शाश्च
मे षट्त्रि ॐ शाश्च मे चत्वारि ॐ शाश्च मे चत्वारि ॐ श्च मे चतुश्च त्वारि ॐ

शाश्च मे ष्टाचत्वारिᳩं शाश्च मे यज्ञेन कल्पंताम् २५ त्र्याविश्च मे त्र्यावी च मे दित्य
वाट् दित्यौही च मे पंचाविश्च मे पंचावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्य्य
वाट् च मे तुर्य्यौही च मे यज्ञेन [illegible] कल्पंताम् २६
पष्ठवाट् च मे पष्ठौही च मऽउक्षा च मे वशा च मऽऋषभश्च मे वेहश्च मेनड्वां
श्च मे धेनुश्च मे यज्ञेन कल्पंताम् २७ वाजाय स्वाहा प्रसवाय स्वाहापिजा
य स्वाहा क्रतवे स्वाहा वसवे स्वाहाहर्पतये स्वाहान्हे मुग्धाय स्वाहा मुग्धा
य वैनᳩशिनाय स्वाहा विनᳩशिनऽआन्त्यायनाय स्वाहान्त्याय भौव

नायस्वाहाभुवनस्यपतयेस्वाहा ऽधिपतयेस्वाहा प्रजापतयेस्वा
हा इयंतेराण्मित्राययंतासियमनऽऊर्ज्जेत्वावृष्ट्यैत्वाप्रजानांत्वाधिप
त्याय २८ आयुर्यज्ञेनकल्पतां प्राणोयज्ञेनकल्पतां चक्षुर्यज्ञेनकल्पता
ꣳश्रोत्रंयज्ञेनकल्पतां वाग्यज्ञेनकल्पतांमनोयज्ञेनकल्पतामात्माय
ज्ञेनकल्पतां ब्रह्मायज्ञेनकल्पताञ्ज्योतिर्यज्ञेनकल्पताꣳ स्वर्यज्ञेन
कल्पतां पृष्ठंयज्ञेनकल्पतांयज्ञोयज्ञेनकल्पताम् स्तोमश्चयजुश्चऽऋ

क्रंसामवब्रह ब्बरथंनरंच स्वर्द्देवाऽअगन्मामृत्ताऽअभूमप्रजापतेः प्रजा
ऽअभूमवेस्वाहा २९ व्वाजस्यनुप्प्रसवेमातरंम्महीमदितिंनामवचसाक
रामहे यस्यामिदंव्विश्वंभुवनमाविवेशतस्यान्नोदेवसविताधर्म्मसावि
षत् ३० विश्वेऽअद्यमरुतोव्विश्वऽऊती। विश्वेभवंत्वग्नयः समिद्धाः
व्विश्वेनोदेवाऽअवसागमंतुव्विश्वमस्तु द्रविणंव्वाजोऽअस्मे ३१ व्वाजो
नः सप्तप्प्रदिशश्चतस्रोव्वापरावतः व्वाजोनोव्विश्वैर्द्देवैर्द्धनसाताविहा
वतु ३२ व्वाजोनोऽअद्यप्रसुवातिदानंव्वाजोदेवाँ २ऋतुभिःकल्पया

ति वाजोहिमासर्व्ववीरंजजानविश्वाऽआशावाजपतिर्ज्जयेयम् ३३
वाजः पुरस्तात् वाजः पुरस्तादुतमध्यतोनोवाजोदेवान्हविषावर्द्धया
ति वाजोहिमासर्व्ववीरंचकारसर्व्वाऽआशावाजपतिर्भवेयम् ३४ सम्मा
सृजामिपयसापृथिव्याः सम्मासृजाम्यद्भिरोषधीभिः सोहंवाजꣳ
सनेयमग्ने ३५ पयः पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपये
धाः पयस्वतीः प्रदिशः संतुमह्यम् ३६ देवस्यत्वासवितुः प्रसवेश्वि
नोर्बाहुभ्यांपूष्णोहस्ताभ्याम् सरस्वत्यैवाचोयन्तुर्यन्त्रेणाग्नेः साम्रा

ज्ञेनाभिषिंचामि ३७ ऋताषाडृतधामाग्निर्गंधर्व्वस्तस्यौषधयोऽप्सरसोमु
दोनाम सनऽइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यः स्वाहा ३८ सꣳहितोवि
श्वसामासूर्य्योगंधर्व्वस्तस्यमरीचयोऽप्सरसऽआयुवोनाम सनऽइदंब्रह्मक्ष
त्रंपातुतस्मैस्वाहावाट्ताभ्यः स्वाहा ३९ सुषुम्णः सूर्य्यरश्मिश्चंद्रमागंध
र्व्वस्तस्यनक्षत्राऽप्सरसोभेकुरयोनाम सनऽइदंब्रह्मक्षत्रंपातुतस्मैस्वा
हावाट्ताभ्यः स्वाहा ४० इषिरोविश्वव्यचावातोगंधर्व्वस्तस्याऽपोअ
प्सरसऽऊर्ज्जोनाम सनऽइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्ताभ्यः स्वाहा ४१

भुज्युः सुपर्णोयज्ञोगंधर्वस्तस्यदक्षिणाऽअप्सरसस्तावानाम सनऽइ
दंब्रह्मक्षत्रंपातु तस्मैस्वाहा वाट्ताभ्यः स्वाहा ४२ प्रजापतिर्विश्वकर्मामन
नोगंधर्वस्तस्यऋक्सामान्यप्सरसऽएष्टयोनाम सनऽइदंब्रह्मक्षत्रंपातु
तस्मैस्वाहावाट्ताभ्यःस्वाहा ४३ सनः सनोभुवनस्यपते प्रजापतेयस्य
तऽउपरिगृहायस्यवेह अस्मैब्रह्मणेऽस्मैक्षत्रायमहिशर्मयच्छस्वा
हा ४४ समुद्रोसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभिमावाहिस्वा
हामारुतोसिमरुतांगणः शंभूर्मयोभूरभिमावाहिस्वाहावस्यूरसि

दुवस्वांछꣳभूर्म्मयोभूरभिमावाहिस्वाहा ४५ यास्ते अग्नेसूर्य्येरुचो
दिवमातन्वंतिरश्मिभिः ताभिर्न्नोऽअद्यसर्व्वाभीरुचेजनायनस्कृधि
४६ यावः यावोदेवाःसूर्य्योरुचोगोष्वश्वेषुयारुचः इंद्राग्नीताभिःस
र्व्वाभीरुचन्नोधत्तबृहस्पते ४७ रुचन्नः रुचन्नोधेहिब्राह्मणेषुरुचꣳ
राजसुनस्कृधि रुचंविश्येषुशूद्रेषुमयिधेहिरुचारुचम् ४८ तत्वा
यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरु
णेहवोध्युरुशꣳस मानऽआयुःप्रमोषीः ४९ स्वर्णघर्म्मःस्वाहा

स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्ज्योतिः स्वाहा स्वर्णसूर्य्यः स्वा
हा ५० अग्निंयुनज्मिशवसा घृतेनदिव्यꣳ सुपर्णंवयसाबृहंतम्
तेनवयंगमेमब्रध्नस्यविष्टपꣳ स्वोरुहाणाऽअधिनाकमुत्तमम् ५१
इमौते पक्षावजरौपतत्रिणौ याभ्याꣳ रक्षाꣳ स्यपहꣳ स्यग्ने ता
भ्यांपतेमसुकृतामुलोकंयत्रऋषयोजग्मुः प्रथमजाः पुराणाः ५२
इंदुर्दक्षः श्येनऽऋतावाहिरण्यपक्षः शकुनोभुरण्युः महांसधस्थे
ध्रुवऽआनिषत्तोनमस्तेऽअस्तुमामाहिꣳसी ५३ दिवोमूर्द्धासिपृ

थिव्यानाभिरुर्णयामोबधीनाम् विश्वायुःशर्म्मसप्प्रथानमस्पथे ५४ वि
श्वस्यमूर्द्धन्नधितिष्ठसिश्रितः समुद्रेतेहृदयमप्स्वायुरपोदत्तोदधिंभिंतः दि
वस्पर्जन्न्यादंतरिक्षात्पृथिव्यास्ततोनोवृष्ट्याव ५५ इष्टोयज्ञोभृगुभिरा
शीर्दावसुभिः तस्यनऽइष्टस्यप्रीतस्यद्रविणेहागमेः ५६ इष्टोऽअग्निरा
हुतःपिपर्त्तुनऽइष्टंहविः स्वगेदंदेवेभ्योनमः ५७ यदाकूतात्समसु
स्रोद्धृदोवामनसोवासंभृतंचक्षुषोवा तदनुप्रेतसुकृतामुलोकंयत्रऽ
ऋषयोजग्मुःप्रथमजाःपुराणाः ५८ एतंछंसधस्थपरितेददामि

यमाबहाछेवधिंजातवेदाः अन्वागंतायज्ञपतिर्वोऽअत्रतथंस्म
जानीतपरमेव्योमन् ५९ एतंजानाथपरमेव्योमन्देवाः सधस्थाविद
रूपमस्य यदागच्छात्पथिभिर्देवयानैरिष्टापूर्तेकृणवाथाविरस्मै
६० उद्बुध्यस्वाग्ने प्रतिजागृहित्वमिष्टापूर्तेसथंसृजेथामयंच अ
स्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ६१ येनव
हसि सहस्रंयेनाग्नेसर्ववेदसम् तेनेमंयज्ञन्नोनयस्वर्देवेषुगंतवे ६२
प्रस्तरेणपरिधिनास्रुचावेद्याचवर्हिषा ऋचेमंयज्ञन्नोनयस्वर्दे

वेषुगंन्नवे ६३ यद्दत्तंयत्परादानंयत्पूर्त्तंयाश्चदक्षिणाः तदग्निर्वैश्वक
र्म्मणः स्वर्देवेषुनोदधत् ६४ यत्रधाराऽअनपेतामधोर्घृतस्यचयाः त
दग्निर्वैश्वकर्म्मणः स्वर्देवेषुनोदधत् ६५ अग्निरस्मिजन्मनाजात
वेदाघृतम्मेचक्षुरमृतम्मऽआसन् अर्कस्त्रिधातूरजसोविमानोजस्रो
घर्म्मोहविरस्मिनाम ६६ ऋचोनामऋचोनामास्मियजूꣳषिनामास्मि
सामानिनामास्मि येऽअग्नयः पांचजन्याऽ अस्यांपृथिव्यामधि तेषा
मसित्वमुत्तमः प्रनोजीवातवेसुव ६७ वार्त्रहत्यायशवसेपृतनाषाह्या

यच्च इंद्रत्वा वर्त्तयामसि ६८ सहदानुं पुरुहूत क्षियंतमहस्तमिंद्रसंपि
णक्कुणारुम् अभिवृत्रं वर्द्धमानंपियारुमपादमिंद्र तवसाजघंथ ६९
वि न इंद्रमृधोजहि नीचायछ पृतन्यतः योऽ अस्माँ २३ अभिदास
धरं गमया तमः ७० मृगोन भीमः कुचरो गिरिष्ठाः परावतऽ आजगंथा
परस्याः सृकं संशाय पविमिंद्र तिग्मं विशत्रून्ताढि विमृधोनुदस्व
७१ वैश्वानरोन ऊतयऽ प्रयातु परावतः अग्निर्नः सुष्टुतीरुप ७२ पृ
ष्टोदिवि पृष्टोऽ अग्निः पृथिव्यां पृष्टो विश्वाऽ ओषधीराविवेश वैश्वा

नरः सहसाप्रष्ठो ऽ अग्निः सनो दिवा स रिषस्पातु नक्तम् ७३ अश्यामत्त
म् अश्यामत्तं काममग्ने तवोती ऽ अश्याम तं काममग्ने तवोती ऽ अश्याम र
यिꣳ रयिवः सुवीरम् अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराज
रं ते ७४ वयं ते ऽ अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य यजिष्ठे
न मनसा यक्षि देवानस्रेधता मन्मना विप्रो ऽ अग्ने ७५ धामच्छदग्नि
ऽ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः सचेतसो विश्वे देवा यज्ञ
प्रावन्तु नः शुभे ७६ त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः रक्षा तोक

मुत्तत्मना ७७ स्वाद्वीत्वा इतिसंहितायांअष्टादशोध्यायः ॥१८॥
स्वीद्वीत्वा स्वादुनाती व्रांती त्रेणामन्नामन्र तेन मधमंतीमधमताम्र
जाम्रिसछंसोमेन सोमोस्यश्विभ्यांपच्यस्वरस्व सैपच्यस्वेंद्राय आग्नेयो
पच्यस्व १ परीतः परीतोषिंचतासुतछं सोमोयउत्तमछं हविः दधन्वा
योनर्योऽअप्स्वंतरासुरवावसोममद्रिभिः २ वायोः पूतउपावित्रेण प्र
त्यंक्सोमोऽअतिस्रुतः इंद्रस्ययुज्यःसरवा वायोः पूतःपवित्रेणप्राङु
क्सोमोऽअतिद्रुतः इंद्रस्ययुज्यासरवा २ पुनातितेपरिस्रुतछंसोम

सूर्य्यस्य दुहिता वरित्रेण शश्वता तना ४ ब्रह्म क्षत्रं पवते तेज ऽ इन्द्रियं
सुरया सोमः सुत ऽ आसुतो मदाय शुक्रेण देव देवताः पिपृग्धि रसेनान्नं य
जमानाय धेहि ५ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम ऽ उक्तिं यजन्ति ६ उपयामगृ
हीतोस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ऽ एष ते योनिस्तेजसे त्वा
वीर्य्याय त्वा बलाय त्वा ७ नाना हि वां देवहितं सदस्कृतं मा सं
सृक्षाथां परमे व्योमन् सुरा त्वमसि शुष्मिणी सोम ऽ एष मा मा हिं

१३

सीः स्वां योनिमाविशन्ती अयपामगृहीतोस्याग्निं नं तेजसः सारस्वतं वी
र्य्यमैंद्रं बलम् एषतेयोनिर्म्मोदायत्वानंदायत्वामहसेत्वा २ तेजोसि
तेजोमयिधेहि वीर्य्यमसि वीर्य्यम्मयिधेहि बलमसि बलम्मयिधेह्योा
जोस्योजोमयिधेहिमन्युरसिमन्युंमयिधेहि सहोसिसहोमयिधेहि ९॥
याव्याघ्रं विषूचिकोभौ वृकंच रक्षति श्येनंपतत्रिणं सिंहं सेमं
पात्वंहसः १० यदापिपेषमातरं पुत्रः प्रमुदितोधयन् एतत्तदग्ने
ऽअनृणोभवाम्यहतौ पितरौमया संपृचस्थसम्मा भद्रेणपिङ्क्त विपृच

स्य त्विषिमायापस्मनायं इंद्रम् ११ देवा यज्ञमतन्वत भेषजं भिषजाश्विना वाचास
रस्वती भिषगिंद्रायेंद्रियाणि दधतः १२ दीक्षायै रूपम् दीक्षायै रूप थं श
ष्पाणि प्रायणीयस्य तोक्मानि क्रयस्य रूप थं सोमस्य लाजाः सोमा थं श
वो मधु १३ आतिथ्यरूपं मासरं महावीरस्य नग्नहुः रूपमुपसदामेत
त्तिस्रो रात्रीः सुरासुता १४ सोमस्य रूपं क्रीतस्य परिस्रुत्परिषिच्यते अ
श्विभ्यां दुग्धं भेषजमिंद्रायैंद्र थं सरस्वत्या १५ आसंदी रूप थं राजासंद्यै
वेद्यै कुंभी सुराधानी अंतर उत्तरवेद्या रूपं कारोतरो भिषक् १६ वेद्या

वेदिः वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् यूपेन यूपऽआप्यते
प्रणीतोऽअग्निरग्निना १७ हविर्द्धानं यदश्विनाग्नीध्रं यत्सरस्वती
इंद्रायैंद्रꣳ सदस्कृतं पत्नीशालं गार्हपत्यः १८ प्रैषेभिः प्रैषानाप्नोत्या
प्रीभिराप्रीर्य्यज्ञस्य प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः १९ पशु
भिः पशून् पशुभिः पशूनाप्नोति पुरोडाशैर्हवीꣳष्या छंदोभिः सा
मिधेनीर्य्याज्याभिर्वषट्कारान् २० धानाः करंभः सक्तवः परीवापः
पयोदधि सोमस्य रूपꣳ हविषऽआमिक्षा वाजिनं मधु २१ धानाना

ꣳ रूपं कुवलं परीवापस्य गोधूमाः सक्तूनाꣳ रूपं बदरमुपवाकाः क
रंभस्य २२ पयसो रूपं यद्यवा दध्नो रूपं कर्कंधूनि सोमस्य रूपं वाजिनꣳ
सौम्यस्य रूपमामिक्षा २३ आश्रावयेति स्तोत्रियाः प्रत्याश्रावोऽअनुरूपः
यजेति धाय्या रूपं प्रगाथा येयजामहाः २४ अर्द्धऋचैरुक्थानाꣳ रूपं
पदैराप्नोति निविदः प्रणवैः शस्त्राणाꣳ रूपं पयसा सोमऽआप्यते २५ अ
श्विभ्यां प्रातःसवनमिंद्रेणैंद्रं माध्यंदिनम् वैश्वदेवꣳ सरस्वत्या तृतीय
माप्तꣳ सवनम् २६ वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम्

नाशिषः शंयुना पत्नीसंयाजान्त्समिष्ट

कुंभीभ्यामंभृणौ सुते स्थालीभि स्थालीराप्नोति २७ यजुर्भिराप्यंन्ते ग्रहा
ग्रहैस्तोमाश्च विष्टुतीः छंदोभिरुक्थाशस्त्राणि साम्नावभृथ आप्यते
२८ इडाभिर्भक्षा नाप्नोति सूक्तवाकैर्यजुषा स ᳪं स्थाम् २९ व्रतेन दीक्षा
माप्नोति दीक्षयाप्नोति दक्षिणाम् दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्य
माप्यते ३० एतावद्रूपं यज्ञस्य यद्देवैर्ब्रह्मणा कृतम् तदेतत्सर्वमाप्नो
यज्ञे सौत्रामणी सुते ३१ सुरावंतं बर्हिषद ᳪं सुवीरं यज्ञ ᳪं हिन्वंति
महिषा नमोभिः दधानाः सोमं दिवि देवतासु मदेनेन्द्रं यजमानाः स्वर्काः ३२

तः ऽ उषधीषु सोमस्यशुष्मः सुरयासुतस्यतेनाजिन्वयजमानंमदेनसरस्व
तीमश्विनाविंद्रमग्निम् ३३ यमश्विना नमुचेरासुरादधि सरस्वत्यसुनो
दिंद्रियाय इमंत ँ शुक्रंमधुमंतमिंदु ँ सोम ँ राजानमिहभक्षयामि
३४ यदत्ररिप्त ँ रसिनः सुतस्ययदिंद्रोऽअपिबच्छचीभिः अहं तदस्य
मनसाशिवेनसोम ँ राजानमिहभक्षयामि ३५ पितृभ्यः स्वधायिभ्यः
स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधा
यिभ्यः स्वधानमः अक्षन्पितरोऽमीमदंतपितरोऽतीतृपंतपितरः पितरः शु
दो

१९

रू ऋदम् ३६ पुनंतुमापितरःसोम्यासः पुनंतुमापितामहाः पुनंतुप्रपितामहाः पवित्रेणशतायुषा पुनंतुमापितामहाः पुनंतुप्रपितामहाः पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै ३७ अग्नऽआयूꣳषिपवसऽआसुवोर्ज्जमिषंचनः आरेबाधस्वदुच्छुनाम् ३८ पुनंतुमादेवजनाः पुनंतुमनसाधियः पुनंतुविश्वाभूतानिजातवेदः पुनीहिमा ३९ पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत् अग्नेक्रत्वाक्रतूꣳरनु ४० यत्तेः पवि

त्रेमर्चिष्यग्नेविततमंतरा ब्रह्मतेनपुनातुमा ४१ पवमानःसःपवमानः
सोऽअद्यनःपवित्रेणविचर्षणिः यःपोतासपुनातुमा ४२ उभाभ्यान्देवसवि
तःपवित्रेणसवेनच॥मांपुनीहिविश्वतः॥४३॥वैश्वदेवीपुनती।देव्यागा
द्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठाः॥तयामदन्तःसधमादेषुवयꣳस्याम
पतयोरयीणाम॥४४॥येसमानाःसमनसःपितरोयमराज्ये॥तेषांलोकः
स्वधानमोयज्ञोदेवेषुकल्याताम्॥४५॥येसमानाःसमनसोजीवाजीवेषुमा
मकाः॥तेषाꣳश्रीर्म्मयिकल्प्यतामस्मिँल्लोकेशतꣳसमाः॥४६॥द्वेसृती॥

ऽअस्त्त एव न्पितृणां महन्देवानामुत मर्त्यानाम् ॥ ताभ्यामिदं विश्वमे
जत्समेति यदन्तरा पितरम्मातरञ्च ॥४७॥ इदं हविः ॥ प्रजननम्मे
ऽअस्तु दशवीरं सर्वगणं स्वस्तये ॥ आत्मसनि प्रजासनि पशुस
नि लोकसन्यभयसनि ॥ अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतो
ऽअस्मासु धत्त ॥४८॥ उदीरताम् । उदीरतामवर ऽउत्पराऽउन्मध्यमाः
पितरः सोम्यासः ॥ असुं यऽईयुरवृका ऽऋतज्ञास्ते नो वन्तु पितरो हवे
षु ॥४९॥ अङ्गिरसो नः ॥ पितरो नवग्वा ऽअथर्वाणो भृगवः सोम्यासः ॥

तेषां व्वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥५०॥ येनः येनः पूर्वे

पितरः सोम्यासोनूहिरे सोमपीथं व्वसिष्ठाः ॥ तेभिर्य्यमः सꣳ रराणो हवीꣳष्युश

न्नुशद्भिः प्रतिकाममत्तु ॥५१॥ त्वꣳ सोम। त्वꣳ सोम प्प्रचिकितो मनीषा त्वꣳ र

जिष्ठमनु नेषि पन्थाम्। तव प्प्रणीती पितरो नऽ इन्दो देवेषु रत्नमभजन्त धी

राः ॥५२॥ त्वया हि नः पितरः सोम पूर्वे कर्म्माणि चक्रुः पवमान धीराः ॥ व्वन्व

न्नवातः परिधीꣳ ॥ रपोर्णु वीरेभिरश्वैर्म्मघवा भवा नः ॥५३॥ त्वꣳ सोम पितृ

भिः संविदानोनु द्यावापृथिवीऽ आततन्थ ॥ तस्मै तऽ इन्दो हविषा विधेम व

यथं स्याम पतयो रयीणाम् ॥५४॥ वर्हिषदः पितरः। वर्हिषदः पितर ऽऊत्यर्वागिमा
वो हव्या चकृमा जुषध्वम् ॥ त ऽआगतावसा शन्तमेनाथ नः शंय्योररपो दधात
॥५५॥ आहम्। आह पितॄन्त्सुविदत्राँ २ ॥ ऽअवित्सि नपातञ्च विक्रमणञ्च
विष्णोः ॥ वर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त ऽइहागमिष्ठाः ॥५६॥ उप
हूताः पितरः। सोम्यासो वर्हिष्येषु निधिषु प्रियेषु ॥ त ऽआगमन्तु त ऽइह श्रुव
न्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥५७॥ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः
पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्

॥५८॥ अग्निष्वात्ताः पितरः। अग्निष्वात्ताः पितरऽएहगच्छत सदःसदः सद
न्तसुप्रणीतयः॥ अत्ताहवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरन्दधा
तन॥५९॥ येऽअग्निष्वात्ताः। येऽअग्निष्वात्ता येऽअनग्निष्वात्ता मध्ये दिवः
स्वधया मादयन्ते॥ तेभ्यः स्वराडसुनीतिमेतां यथावशन्तन्वङ्कल्पयाति॥६०॥
अग्निष्वात्तान् ऋतुमतः। अग्निष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथं
यऽआशुः॥ तेनो विप्रासः सुहवा भवन्तु वयꣳ स्याम पतयो रयीणाम्॥६१॥ आ
च्याजानु। दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे॥ माहिꣳसिष्ट पितरः

केनचिन्नो यद्व ऽ आगः पुरुषता कराम ॥६२॥ आसीनासो ऽ अरुणीनाम्। आसीना
सो ऽ अरुणीनामुपस्थे रयिन्धत्त दाशुषे मर्त्याय॥ पुत्रेभ्यः पितरस्तस्य वस्वः प्र
यच्छत त ऽ इहोर्जन्दधात ॥६३॥ यमग्ने॥ कव्यवाहन त्वञ्चिन्मन्यसे रयिम्॥
तन्नो गीर्भिः श्रवाय्यन्देवत्रा पनया युजम् ॥६४॥ यो ऽ अग्निः। कव्यवाहनः पितॄ
न्यक्षदृतावृधः॥ प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य ऽ आ ॥६५॥ त्वमग्ने।
त्वमग्न ऽ ईडितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी॥ प्रादाः पितृभ्यः
स्वधया ते ऽ अक्षन्नद्धि त्वन्देव प्रयता हवींषि ॥६६॥ ये चा ये चेह पितरो

येचनेहयाँश्चविद्मयाउँ॥ऽउचनप्रविद्म॥त्वंवेत्थयतितेजातवेदःस्वधाभि
र्यज्ञꣳसुकृतञ्जुषस्व॥६७॥ इदम्पितृभ्यः।इदम्पितृभ्योऽनमोऽअस्त्वद्ययेपू
र्वासोयऽउपरासऽईयुः॥येपार्थिवेरजस्यानिषत्ता।येवानूनꣳसुवृजनासुवि
क्षु॥६८॥अधायथा।नःपितरःपरासःप्रत्नासोऽअग्नऽऋतमाशुषाणाः॥शु
चीदयन्दीधितिमुक्थशासःक्षामाभिन्दन्तोऽअरुणीरपव्रन्॥६९॥ उशन्त
स्त्वा॥ उशन्तस्त्वानिधीमह्युशन्तःसमिधीमहि उशन्नुशतऽआवहपितॄ
न्हविषेऽअत्तवे॥७० अपाम्फेनेन।अपाम्फेनेननमुचेः।शिरऽइन्द्रोदवर्तयः

विश्वायदर्जयस्पृधः ॥७२॥ सोमोराजा। सोमोराजामृत सुत ऽ ऋजीषेणाजहा
न्मृत्युम्॥ ऋतेनसत्यमिन्द्रियंविपान शुक्रमन्धसऽइंद्रस्येन्द्रियमिदम्प
योमृतम्मधु ॥७२॥ अद्भ्यःक्षीरम्। अद्भ्यःक्षीरंव्यपिवत्क्रुङ्ङाङ्गिरसोधिया॥
ऋतेनसत्यमिन्द्रियंविपान शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु
॥७३॥ सोममद्भ्यः। सोममद्भ्योव्यपिबच्छन्दसाहं सः शुचिषत् ऋतेनसत्य
मिन्द्रियंविपान शुक्रमन्धसःऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु॥७४॥
॥शतं१०० अन्नात्परिस्रुतः। अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिवत्क्ष

त्रम्पयः सोमम्प्रजापतिः॥ ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रिय
मिदम्पयोऽमृतम्मधु॥७५॥ रेतोमूत्रम्। रेतोमूत्रंविजहातियोनिम्प्रविशदिन्द्रिय
म्॥गर्ब्भोजरायुणावृतऽउल्बञ्जहातिजन्मना॥ ऋतेनसत्यमिन्द्रियंविपानꣳ
शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु॥७६॥ दृष्ट्वारूपे। व्याकरोत्स
त्यानृतेप्रजापतिः॥ अश्रद्धामनृतेदधाच्छ्रद्धाꣳसत्येप्रजापतिः॥ ऋतेनसत्यमि
न्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु॥७७॥ वेदेनरूपे।
व्यपिबत्सुतासुतौप्रजापतिः ऋतेनसत्यमिन्द्रियं।विपानꣳशुक्रमन्धसऽइं

न्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७८॥ दृष्ट्वापरिस्रुतः। दृष्ट्वापरिस्रुतो रसꣳ शुक्रे
ण शुक्रं व्यपिबत्पयः सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्र
मन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७९॥ सीसेनतन्त्रम्। सीसेनतन्त्र
म्मनसामनीषिणऽऊर्णासूत्रेण कवयो वयन्ति ॥ अश्विना यज्ञꣳ सविता स
रस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥८०॥ तदस्य। रूपममृतꣳ शचीभिस्ति
स्रो दधुर्देवताः सꣳरराणाः ॥ लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मां
ꣳसमभवन्न लाजाः ॥८१॥ तदश्विना। भिषजा रुद्रवर्त्तनी सरस्वती वयति पे

श्रो ऽअन्तरम् ॥ अस्थिमज्जानम्मासरैः कारोतरेणदधतोगवान्त्वचि ॥ ८२ ॥ स
रस्वतीमनसा । पेशलंवसुनासत्याब्भ्यांवयतिदर्शतंवपुः ॥ रसम्परिस्रुतानरोहि
तन्नग्नहुर्द्धीरस्तसरन्नवेम् ॥ ८२ ॥ पयसाशुक्रम् । पयसाशुक्रममृतञ्जनित्र
ᳫं सुरयामूत्राज्जनयन्तरेतः ॥ अपामतिन्दुर्म्मतिम्बाधमाना ऽऊवध्यंवातᳫं स
ब्ब्यन्तदारात् ॥ ८३ ॥ इन्द्रः सुत्रामा । इन्द्रः सुत्रामाहृदयेनसत्यम्पुरोडाशेनसवि
ताजजान ॥ यकृत्क्लोमानंवरुणोभिषज्यन्मतस्नेवायव्यैर्नमिनातिपित्तम्
॥ ८४ ॥ आन्त्राणिस्थालीः ॥ आन्त्राणिस्थालीर्म्मधुपिन्वमानागुदाः पात्राणि

सुदुघा न धेनुः ॥ श्येनस्य पत्रन्न प्लीहा शचीभिरासन्दी नाभिरुदरन्न माता ॥ ८६ ॥

ग्रो कुम्भो वनिष्ठुः । कुम्भो वनिष्ठुर्ज्जनिता शचीभिर्य्यस्मिन्नग्रे योन्यां गर्भोऽअन्तः

॥ प्लाशिर्व्यक्तः शतधारऽउत्सो दुहे न कुम्भी स्वधाम्पितृभ्यः ॥ ८७ ॥ मुखं सत्

मुखं सदस्य शिरऽइत्सतेन जिह्वा पवित्रमश्विनासन्त्सरस्वती ॥ चप्यन्न पा

युर्भिषगस्य वालो वस्तिर्न्न शेपो हरसा तरस्वी ॥ ८८ ॥ अश्विभ्याञ्चक्षुः अश्वि

भ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेन तेजो हविषा शृतेन ॥ पक्ष्माणि गोधूमैः कु

वलैरुतानि पेशो न शुक्लमसितं वसाते ॥ ८९ ॥ अविर्न्न । मेषो नसि वीर्याय प्रा

र्णा

एस्य पन्थाः ॥ अमृतो ग्रहाभ्याम् ॥ सरस्वत्युपवाकै र्व्यानन्नस्यानि बर्हि र्बदरै

र्ज्जजान ॥९०॥ इन्द्रस्य रूपम् । इन्द्रस्य रूपमृषभो बलाय कर्णाभ्याᳬं श्रोत्रममृ

प ३ तङ्ग्रहाभ्याम् ॥ यवा न बर्हि र्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघम्मुखात् ॥९१॥

आत्मन्नुपस्थे । आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ॥

केशा न शीर्षन्यशसे श्रियै । शिखा सिᳬंहस्य लोम त्विषि रिन्द्रियाणि ॥९२॥ अ

ङ्गान्यात्मन् । अङ्गान्यात्मन्भिषजा तदश्विनात्मानमङ्गैः समधात्सरस्व

ती ॥ इन्द्रस्य रूपᳬं शतमानमायुश्चन्द्रेण ज्योतिरमृतन्दधानाः ॥९३॥ सर

स्वतीयोन्न्याम्। सरस्वतीयोन्न्याङ्गर्ब्भमन्तरश्विभ्याम्पत्नीसुकृतम्बिभर्त्ति॥
अपाꣳरसेनवरुणोनसाम्नेन्द्रꣳश्रियैजनयन्नप्सुराजा ॥९४॥ तेजःपशू
नाम्। तेजःपशूनाꣳहविरिन्द्रियावत्परिस्रुतापयसासारघम्मधु॥ अश्वि
भ्यान्दुग्धम्भिषजासरस्वत्यासुतासुताभ्याममृतःसोमऽइन्दुः॥९५॥ इतिसं
हितापाठेएकोनविंशोध्यायः॥ ॥ क्षत्रस्ययोनिः। क्षत्रस्ययोनिरसिक्षत्रस्य
नाभिरसि॥मात्वाहिꣳसीन्मामाहिꣳसीः॥१॥ निषसाद। धृतव्रतोवरुणः
पस्त्यास्वा॥साम्राज्यायसुक्रतुः॥मृत्योःपाहिविद्योत्त्वाहि॥२॥देवस्यत्वा।सवि

नुः प्प्रसवे ऽश्विनो र्बाहु भ्यां पूष्णो हस्ताभ्याम् ॥ २ ॥ अश्विनो र्भैषज्येन तेजसे ब्र
ह्मवर्च्चसाया भिषिञ्चामि सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामी
न्द्रस्येन्द्रियेणबलाय श्रियै यशसे भिषिञ्चामि ॥ ३ ॥ कोसि कतमोसि कस्मै त्वा
काय त्वा ॥ सुश्लोक सुमङ्गल सत्यराजन् ॥ ४ ॥ शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ॥ राजा मे प्राणोऽअमृतꣳ सम्राट् चक्षुर्विराट्श्रो
त्रम् ॥ ५ ॥ जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड्भामः ॥ मोदाः प्रमोदाऽअङ्गु
लीरङ्गानि मित्रं मे सहः ॥ ६ ॥ बाहू मे बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म्म वी

र्यमम्॥ आत्मादस अमु रोमम॥७॥ पृष्टीर्म्मे। राष्ट्रमुदरमꣳसौग्रीवाश्च श्रोणी॥
ऊरूऽअरत्नीजानुनी विशोमेऽङ्गानिसर्व्वतः॥८॥ नाभिर्म्मे। चित्तं विज्ञानम्पायुर्म्मे
पचितिर्ब्भसत्॥ आनन्दनन्दावाण्डौमेभगः सौभाग्यम्पसः॥ जङ्घाभ्याम्पद्भ्यान्ध
र्म्मोऽस्मिविशिराजाप्रतिष्ठितः॥९॥ प्रतिक्षत्रे। प्रतितिष्ठामिराष्ट्रे प्रत्यश्वेषु
प्रतितिष्ठामिगोषु॥ प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रतिप्राणेषु प्रतितिष्ठामिपु
ष्टे प्रतिद्यावापृथिव्योः प्रतितिष्ठामियज्ञे॥१०॥ त्रयादेवाः। त्रयादेवाऽएका
दशात्त्रयस्त्रिꣳशाः सुराधसः॥ बृहस्पतिपुरोहितादेवस्यसवितुः सवे॥

देवादेवैरवन्तुमा ॥११॥ प्रथमा द्द्वितीयैः। प्रथमाद्द्वितीयैर्द्द्वितीयास्तृतीयैस्तृती
याः सत्येन सत्त्यं यज्ञेन यज्ञो यजुर्भिर्य्यजूꣳषि सामभिः सामान्यृग्भिर्ऋचः पुरोनु
वाक्याभिः पुरोनुवाक्यायाज्याभिर्य्याज्या वषट्कारैर्व्वषट्कारा आहुतिभिराहु
तयो मे कामान्त्समर्द्धयन्तु भूः स्वाहा ॥१२॥ लोमानि प्रयतिः। लोमानि प्रयतिर्म्म
म त्वङ्म ऽआनतिरागतिः ॥ मांꣳसम्म ऽउपनतिर्व्वस्वस्थि मज्जा म ऽआनतिः ॥
१३॥ यद्देवाः। यद्देवा देवहेडनन्देवासश्चकृमा वयम्। अग्निर्म्मा तस्मादेनसो वि
श्वान्मुञ्चत्वꣳहसः ॥१४॥ यदि दिवा। यदि दिवा यदि नक्तमेनाꣳसि चकृमा

वयम्॥ वायुर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वᳩंहसः॥१५॥ यदि जाग्रत्। यदि
जाग्रद्यदि स्वप्नऽएनाᳩंसि चकृमा वयम्॥ सूर्य्यो मा तस्मादेनसो विश्वान्मु
ञ्चत्वᳩंहसः॥१६॥ यद्ग्रामे। यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये॥ यच्छूद्रे य
दर्य्ये यदेनश्चकृमा वयं यदेकस्याधि धर्म्मणि तस्यावयजनमसि॥१७॥ यदापः।
यदापोऽअघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च॥ अवभृथ निचु
म्पुण निचेरुरसि निचुम्पुणः॥ अव देवैर्देवकृतमेनोयासिषमव मर्त्यैर्मर्त्यकृत
म्पुरुराव्णो देव रिषस्पाहि॥१८॥ समुद्रे। समुद्रे ते हृदयमप्स्वन्तः सन्त्वा विश

न्तोषधीरुतापः॥सुमित्रियानऽआपऽओषधयः सन्तुदुर्मित्रियास्तस्मैसन्तुयो
स्मान्द्वेष्टियञ्चवयन्द्विष्मः॥१९॥ द्रुपदादिव। मुमुचानः स्विन्नःस्नातोमलादि
व॥पूतम्पवित्रेणेवाज्यमापःशुन्धन्तुमैनसः॥२०॥ उद्वयम्। उद्वयन्तमसस्प
रिस्वःपश्यन्तऽउत्तरम्। देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम्॥२१॥ अपो
ऽअद्य। अपोऽअद्यान्वचारिषंरसेनसमसृक्ष्महि॥ पयस्वानग्नऽआगम
न्तम्मासंसृजवर्च्चसाप्रजयाचधनेनच॥२२॥ एधोसि। एधोस्येधिषीमहि
समिदसितेजोमयिधेहि॥समाववर्त्तिपृथिवीसमुषाः समुसूर्य्यः॥समुवि

श्चमिदंजगत्॥ वैश्वानरज्ज्योतिर्भूयासंविभून्कामान्व्याश्नवैभूः स्वा
हा॥२३॥ अग्न्यादधामि। समिधमग्नेव्रतपतेत्त्वयि व्रतञ्चश्रद्धाञ्चोपैमीन्धे
त्वादीक्षितोऽहम्॥२४॥ यत्रब्रह्म। चक्षत्रञ्चसम्यञ्चौचरतःसह॥ तंल्लोक
म्पुण्यम्प्रज्ञेषंयत्रदेवाः सहाग्निना॥२५॥ यत्रेन्द्रः। यत्रेन्द्रश्चवायुश्चसम्यञ्चौ
चरतःसह॥ तंल्लोकम्पुण्यम्प्रज्ञेषंयत्रसेदिर्नविद्यते॥२६॥ अंशुनाते। अं
शुःपृच्यताम्परुषापरुः॥ गन्धस्तेसोममवतुमदायरसोऽअच्युतः॥२७॥
सिञ्चन्तिपरि। षिञ्चन्त्युत्सिञ्चन्तिपुनन्तिच॥ सुरायैबभ्र्वैमदे किन्त्वोवदतिकिन्त्विः॥२८॥

धानावन्तङ्करम्भिणम्। धानावन्तङ्करम्भिणमपूपवन्तमुक्थिनम्। इन्द्रप्रा
तर्ज्जुषस्वनः ॥२९॥ बृहदिन्द्राय। गायतमरुतो वृत्रहन्तमम् ॥येनज्ज्योति
रजनन्नृतावृधोदेवन्देवायजागृवि ॥३०॥ अध्वर्योऽअद्रिभिः। सुतꣳसोमम्प
वित्रऽआनय॥ पुनाहीन्द्रायपातवे ॥३१॥ योभूतानाम्। योभूतानामधिपति
र्यस्मिँल्लोकाऽअधिश्रिताः॥ यऽईशेमहतोमहाँस्तेनगृह्णामित्वामहम्म
यिगृह्णामित्वामहम् ॥३२॥ उपयामगृहीतोसि। उपयामगृहीतोस्यश्विभ्या
न्त्वासरस्वत्यै त्वेन्द्रायत्वासुत्राम्णेऽएषतेयोनिरश्विभ्यान्त्वासरस्वत्यैत्वेन्द्राय।

त्वामु त्र्वाम्न्गो ॥३३॥ प्राणपामे । ऽ अपान पाश्व हुष्वा ऽ श्रोत्रापाश्वमे ॥
वाचेमेविश्वभेषजोमनसोसिविलायकः ॥३४॥ आश्विनकृतस्यते
आश्विनकृतस्यतेसरस्वतिकृतस्येन्द्रेणसुत्रोम्णा कृतस्य ॥ उपहूतऽ
उपहूतस्यभक्षयामि ॥३५॥ समिद्धऽइन्द्रः । समिद्धऽइन्द्रऽ उषसामनी
केपुरोरुचापूर्वकृद्वावृधानः ॥त्रिभिर्देवैस्त्रिधंशता वज्रबाहुर्जघान
वृत्रंविदुरोववार ॥३६ नराशधंसधंप्रति । नराशधंसः प्रतिमूरोमिमा

नस्तनूनपात्पान्तियज्ञस्य धाम॥ गोभिर्वपावान्मधुनासमञ्जन्हिरण्यैश्चन्द्रीय
जतिप्रचेता॥३७॥ ईडितोदेवैः। ईडितोदेवैर्हरिवाँ॥ऽअभिष्टिराजुह्वानोहविषा
शर्द्धमानः॥ पुरन्दरोगोत्रभिद्वज्रबाहुरायातुयज्ञमुपनोजुषाणः॥३८॥ जुषाणो
बर्हिः। जुषाणोबर्हिर्हरिवान्नऽइन्द्रः प्राचीनꣳसीदत्प्रदिशापृथिव्याः॥ उरुप्रथाः
प्रथमानꣳस्योनमादित्यैरक्तंवसुभिःसजोषाः॥३९॥ इन्द्रन्दुरः। कवष्योधावमाना
वृषाणंयन्तुजनयःसुपत्नीः॥ द्वारोदेवीरभितोविश्रयन्ताꣳसुवीरावीरम्प्रथमा
नामहोभिः॥४०॥ उषासानक्ताबृहती। बृहन्तम्पयस्वतीसुदुघेशूरमिन्द्रम्॥ तन्तु

न्नतस्पेशसा संव्वयन्तीदेवान्देवं प्प्यजतः सुरुक्मे ॥४१॥ दैव्या मिमाना। दैव्यामिमा
मनुषः पुरुत्रा होतारा विन्द्रम्प्रथमा सुवाचा ॥ मूर्द्धन्यज्ञस्य मधुनादधाना प्राचीन
ञ्ज्योतिर्हविषा वृधातः ॥४२॥ तिस्रोदेवीः। तिस्रो देवीर्हविषा वर्द्धमानाऽ इन्द्रञ्जुषा
णा जनयो नपत्नीः॥ अच्छिन्नन्तन्तुम्पयसा सरस्वतीडा देवी भारती विश्वतूर्त्तिः
॥४३॥ त्वष्टा दधत्। त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेऽपाको चिष्टुर्यशसे पुरूणि ॥ वृ
षा यजन्वृषणं भूरिरेता मूर्द्धन्यज्ञस्य समनक्तु देवान् ॥४४॥ वनस्पति रवसृ
ष्टः। वनस्पतिरवसृष्टो नपाशैस्त्मन्यासमञ्जञ्छमिता नदेवः॥ इन्द्रस्य हव्यै

र्जे ठरस्य एणान्ः स्वदातिय ज्ञम्मधुनाघृतेन ॥४५॥ स्तोकाना मिन्दुमास्तोकाना
मिन्दुम्प्रतिश्शूरऽइन्द्रो वृषायमाणो वृषभस्तुराट् ॥ घृतप्रुषामनसामोदमानाः
स्वाहा देवाऽअमृतामादयन्ताम् ॥४६॥ आयातु। आयात्विन्द्रो वसऽउपनऽइह
स्तुतः सधमादस्तुश्शूरः वावृधानस्तविषीर्य्यस्य पूर्वी र्द्यौर्नक्षत्रमभिभूतिपुष्या
त् ॥४७॥ आनः। आनःऽइन्द्रोदूरादानऽआसादभिष्टिकृदवसेयासदुग्रः ॥ ओजि
ष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सुतुर्वणिः पृतन्यून् ॥४८ आनः। आनऽइ
न्द्रोहरिभिर्यात्वच्छार्वाचीनोवसेराधसेच ॥ तिष्ठातिवज्रीमघवाविरप्शी

मंय्यत्त्वमनुनोवाजसातौ ॥४९॥ त्रातारमिन्द्रम् । त्रातारमिन्द्रमवितारमिन्द्र
थं हवेहवेसुहवथं ॠरमिन्द्रम् ॥ ह्वयामिशक्क्रम्पुरुहूतमिन्द्रथं स्वस्तिनोमघ
वाधात्विन्द्रः ॥५०॥ इन्द्रः सुत्रामा । इन्द्रः सुत्रामास्ववाँ ॥ ऽअवोभिः सुमृडीको
भवतुविश्ववेदाः बाधतान्द्वेषोऽअभयङ्कृणोतुसुवीर्य्यस्यपतयः स्याम ॥५१॥
तस्यवयम् । तस्यवयथं सुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम ॥ ससुत्रामा
स्ववाँ ॥ ऽइन्द्रोऽअस्म्मेऽआराच्चिद्द्वेषः सनुतर्य्युयोतु ॥५२॥ आमन्द्रैः । आमन्द्रै
रिन्द्रहरिभिर्य्याहिमयूररोमभिः ॥ मात्त्वाकेचिन्नियमन्वि

न्नपाशिनोतिधन्न्वेवतारँ॥ऽइहि॥५३॥एवेत्एवेदिन्द्रंवृषणंवज्रबाहुंवसिष्ठासो
ऽअभ्यर्च्चन्त्यर्कैः॥सनस्तुतोवीरवद्धातुगोमद्यूयंपातस्वस्तिभिःसदानः॥५४॥
समिद्धोऽअग्निः समिद्धोऽअग्निरश्विनातप्तोघर्म्मोविराड्सुतः॥दुहेधेनुःसर
स्वतीसोमंशुक्रमिहेन्द्रियम्॥५५॥तनूपाभिषजा।सुतेश्विनोभासरस्वती॥म
ध्वारजांसीन्द्रियमिन्द्रायपथिभिर्वहान्॥५६॥इन्द्रायेन्दुम्।इन्द्रायेन्दुंसरस्व
तीनराशंसेननग्नहुम्॥अधातामश्विनामधुभेषजंभिषजासुते॥५७॥
आजुह्वानासरस्वती।आजुह्वानासरस्वतीन्द्रायेन्द्रियाणिवीर्य्यम्॥इडाभिर

श्विनाविषथंसमूर्ज्जं थंसथंरयिन्दधुः॥५८॥ अश्विनानमुचेः॥ सुतथंसोम
थंशुक्रम्परिस्रुता॥ सरस्वतीतमाभरद्बर्हिषेन्द्रायपातवे॥५९॥ कवष्योन। व्य
चस्वतीरश्विभ्यान्नदुरोदिशः॥ इन्द्रोनरोदसीऽउभेदुहेकामान्त्सरस्वती॥६०
उषासानक्तम्। उषासानक्तमश्विनादिवेन्द्रथंसायमिन्द्रियैः॥ सञ्ज्ञानाने
सुपेशसासमञ्ज्ञातेसरस्वत्या॥६१॥ पातन्नः। पातन्नोऽअश्विनादिवापाहिन
क्तथंसरस्वति॥ दैव्याहोताराभिषजापातमिन्द्रथंसचासुते॥६३॥ त्रिस्त्रे
धा। सरस्वत्यश्विनाभारतीडा॥ तीव्रम्परिस्रुतासोममिन्द्रायसुषुवुर्म्मदम्

॥६३॥ अश्विना भेषजम्। अश्विना भेषजम्मधु भेषजन्नः सरस्वती॥ इन्द्रे त्वष्टा यशः।
श्रियथं रूपथं रूपमधुः सुते॥६४॥ ऋतुथेन्द्रः। ऋतुथेन्द्रो वनस्पतिः शशमानः परि
स्रुता॥ कीलालमश्विभ्याम्मधु दुहे धेनुः सरस्वती॥६५॥ गोभिर्न्न सोममश्विना
मासरेण परिस्रुता॥ समधातथं सरस्वत्या स्वाहेन्द्रे सुतम्मधु॥६६॥ अश्विना ह
विः। अश्विना हविरिन्द्रियन्नमुचेर्द्धिया सरस्वती॥ आ शुक्रमासुराद्वसु मघमिन्द्राय ज
भ्रिरे ६७॥ यमश्विना। यमश्विना सरस्वती हविषेन्द्रमवर्द्धयन्॥ स बिभेद ब
लम्मघन्नमुचावासुरे सचा॥६८॥ तमिन्द्रम्। तमिन्द्रम्पशवः सचाश्विनोभा सरस्वती

दधानाः अश्व्यान्नूषवनहविषायज्ञऽइन्द्रियैः ॥६९॥ यऽइन्द्रे । यऽइन्द्रऽइन्द्रियन्द
धुः सविता वरुणो भगः ॥ ससुत्रामा हविष्पतिर्यजमानाय सश्चत ॥७०॥ सवि
ता वरुणः । सविता वरुणो दधद्यजमानाय दाशुषे ॥ आदत्त नमुचेर्वसु सुत्रामा
बलमिन्द्रियम् ॥७१॥ वरुणः क्षत्रम् । वरुणः क्षत्रमिन्द्रियम्भगेन सविता श्रियम्
॥ सुत्रामा यशसा बलन्दधाना यज्ञमाशत ॥७२॥ अश्विना गोभिः । अश्विना गो
भिरिन्द्रियमश्वेभिर्वीर्यम्बलम् ॥ हविषेन्द्रं सरस्वती यजमानमवर्द्धयन् ॥७३॥
ता नासत्या । सुपेशसा हिरण्यवर्त्तनी नरा ॥ सरस्वती हविष्मतीन्द्र कर्म्मसु नोव

न॥७४॥ ता भिषजा। सुकर्म्मणा सा सुदुघा सरस्वती॥ स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम्॥७५॥ युवꣳ सुराममा। युवꣳ सुराममश्विना नमुचावासुरे स
चा॥ विपिपानाः सरस्वतीन्द्रं कर्म्मस्वावत॥७६॥ पुत्रमिव पितरौ। पुत्रमिव पि
तरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः॥ यत्सुरामं व्यपिवः शचीभिः सरस्व
ती त्वा मघवन्नभिष्णक्॥७७॥ यस्मिन्नश्वासः। यस्मिन्नश्वासऽऋषभास
ऽउक्षणो वशा मेषाऽअवसृष्टासऽआहुताः॥ कीलालपे सोमपृष्ठाय वेधसे
हृदा मतिञ्जनय चारुमग्नये॥७८॥ अहाव्यग्ने। हविरास्ये ते स्रुचीव घृत

ञ्चमन्वीत्व सोमः॥ वाजसनिꣳ रयिमस्मे सुवीरम्प्रशस्तन्धेहि यशसम्बृहन्त
म्॥७९॥ ॥शतं१२००॥ अश्विना तेजसा। अश्विना तेजसा चक्षुः प्राणेन सर
स्वती वीर्य्यम्॥ वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम्॥८०॥ गोमदू षु णासत्या।
गोमदू षु णासत्याश्वावद्यातमश्विना॥ वर्त्ती रुद्रा नृपाय्यम्॥८१॥ न यत्। न
यत्परो नान्तर आदधर्षद्वृषण्वसू॥ दुःशꣳसो मर्त्यो रिपुः॥८२॥ ता नः। ता नऽ
आ वोढमश्विना रयिम्पिशङ्गसन्दृशम्॥ धिष्ण्या वरिवोविदम्॥८३॥ पाव
का नः। पावका नः सरस्वती वाजेभिर्वाजिनीवती॥ यज्ञं वष्टु धियावसुः॥८४॥

17 चोदयित्रीसूनृतानाम्। चोदयित्रीसूनृतानाञ्चेतन्तीसुमतीनाम् ॥यज्ञन्दधेसरस्वती
॥८५॥ महोऽअर्णः। महोऽअर्णःसरस्वतीप्रचेतयतिकेतुना ॥ धियोविश्वाविराजति
॥८६॥ इन्द्रायाहि। चित्रभानोसुताऽइमेत्वायवः ॥ अण्वीभिस्तनापूतासः ॥८७॥ इ
न्द्रायाहि। धियेषितोविप्रजूतःसुतावतःउपब्रह्माणिवाघतः ॥८८॥ इन्द्रायाहि।
इन्द्रायाहितूतुजानऽउपब्रह्माणिहरिवः ॥ सुतेदधिष्वनश्चनः ॥८९॥ अश्वि
नापिबताम्। अश्विनापिबताम्मधुसरस्वत्यासजोषसा ॥ इन्द्रःसुत्रामावृत्रहाजुष
न्ताꣳसोम्यम्मधु ॥९०॥ ॥इतिश्रीवाजसनेयसंहितायांविꣳशोध्यायःसमाप्तः ॥

वाजसनेयीसंहिताहर्वांदिं प॰ १५॰

१से २२५तक